# ŚODHANIDHI

# ( शोधनिधि )

(Peer-Reviewed Annual Research Journal of the Department of Sanskrit, University of Gour Banga)

## Volume IV

Chief Editor
Chandan Bhattacharyya
Assistant Editor
Mrinal Chandra Das

University of Gour Banga
Mokdumpur, Malda
West Bengal

# ŚODHANIDHI

## (शोधनिधि)

(Peer-Reviewed Annual Research Journal of the Department of Sanskrit, University of Gour Banga)

© University of Gour Banga
Malda, West Bengal

Published by :
The Registrar
University of Gour Banga
Malda, West Bengal

Volume : IV, 2019-20

Published : February, 2021

Printed & Published in Collaboration with :
MAHA BODHI BOOK AGENCY
4A, Bankim Chatterjee Street
College Square, Kolkata-700 073
Phone : +9831529452, 9831077368
Email : mahabodhibookagency@hotmail.com

Price : ₹ 500.00

# CONTENT


| | | |
|---|---|---|
| অথর্ববেদঃ | ডঃ সত্যব্রত-পাহাড়ী | 1 |
| BHAKTI AS A RASA: RŪPA GOSVĀMI'S VIEW | Sujata Purkayastha | 13 |
| রবীন্দ্রভাবনায়াম্ উপনিষদ্ | মৃদুলা-রায় | 22 |
| সংক্ষিপ্তসারস্য জৌমরবৃত্তৌ ভট্টিকাব্যস্থানাং কেষাঞ্চনাত্মনেপদ-প্রয়োগাণাং নিদর্শনপ্রসঙ্গঃ। | অরুণ-কুমার-মণ্ডলঃ | 32 |
| पाणिनि-तदितरव्याकरणेषु सम्प्रदानकारकविचार: समाजे तदुपयोगश्च | पार्वती चक्रवर्तिनी | 42 |
| व्याकरणोदाहरणपरम्परायां भूमभट्ट: | डॉ. शशिभूषणमिश्र: | 49 |
| तथ्यभाण्डारव्यवस्थापने अनुबन्धानाम् उपयोग: | सुदीप-मण्डल: | 62 |
| निरुक्तशास्त्रे आदित्यरश्मिस्वरुपविमर्श : | रफिकुल-आलम: | 67 |
| পাণিনীয় ধাতুপাঠ ও ক্ষীরস্বামীকৃত ক্ষীরতরঙ্গিণীর তুলনাত্মক পর্যালোচনা | অনিন্দ্য চৌধুরী | 71 |
| THE VEDIC APPROACH TO PRESERVING ENVIRONMENT– WITH SPECIAL REFERENCE TO PAÑCAMAHĀYAJÑA | Supriya Pal | 81 |
| মহাকবি কালিদাসের কাব্যে পরিবেশ ভাবনা | রাহুল দেব বিশ্বাস | 90 |
| মানবজীবনের মূল্যবোধের নিরীখে মেঘদূত খণ্ডকাব্যের বিচার | অমৃতা দত্ত | 95 |
| SYMBOLIC WORSHIP IN THE LIGHT OF AITAREYA ĀRANYAKA | Sangeeta Mandal | 102 |
| भामह-दण्ड्याचार्ययोर्नये स्वभावोक्त्यतिशयोक्त्यलंकारयो: स्वरुपविश्लेषणम् | सञ्जय-भट्टाचार्य्य: | 111 |
| শ্রীমদ্ভাগবতপুরাণে বর্ণিত বিভিন্ন দার্শনিক সম্প্রদায়ের মত | শ্রীমতী স্নিগ্ধা দাস | 118 |
| মানবতাবাদ ঃ পবিত্র বেদ ও আল্ কুর'আনের আলোকে | আলমগীর মোহাম্মদ সেখ | 125 |

# तथ्यभाण्डारव्यवस्थापने अनुबन्धानाम् उपयोगः

सुदीप-मण्डलः

**१. उपोद्घात :**

संसारेऽस्मिन्नभ्युदयसाधनार्थं विद्यमानः वेदः शब्दतोऽर्थतश्च अतीव दुरवगाहः। स च वेदः परिणतबुद्धिभिः मन्वादिभिः अनायासेन अवगम्यते चेदपि सुकुमारबुद्धिभिः नावगम्यते। अतः वेदार्थावगमाय तदुपकारकाणां षड्वेदाङ्गानामन्येषाञ्च शास्त्राणामाविर्भावः। यथा पुरुषस्याङ्गानि पुरुषस्योपकारकाणि भवन्ति तथैव वेदाङ्गान्यपि वेदस्योपकारकाणि भवन्ति। वेदपुरुषस्य षड् वेदाङ्गानि तावत् शिक्षा कल्पः व्याकरणं निरुक्तं छन्दो ज्योतिषञ्चेति। यथा चोक्तं पाणिनीयशिक्षायाम्—

> **''छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
> **ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।**
> **शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
> **तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।।''**[1] इति।

तेषु वेदाङ्गेषु शब्दसाधुत्वप्रतिपादकत्वेन पदवाक्यार्थप्रतिपादकत्वेन च व्याकरणं मुख्यं भवति। व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इत्यर्थे विपूर्वकात् आङ्पूर्वकात् कृधातोः ''करणाधिकरणयोश्च'' इति सूत्रेण ल्युटि व्याकरणशब्दः निष्पद्यते। अथवा व्याक्रियन्ते प्रकृतिप्रत्ययविभागपूर्वकं विविच्य असाधुशब्देभ्यः साधुशब्दाः पृथक्क्रियन्ते अनेन इति विग्रहे व्याकरणशब्दस्य निष्पत्तिः। व्याकरणाचार्याणां बहुत्वे यद्यपि बहूनां व्याकरणशास्त्राणामाविर्भावः जातः, तथापि तेषु अष्टानां नवानां वा प्रसिद्धिः विद्यते। तेष्वपि पाणिनीयव्याकरणस्य माहात्म्यमधिकम्। तच्च त्रिमुनिप्रणीततया त्रिमुनिव्याकरणमिति नाम्नापि अभिहितम्। यतो ह्यादौ शास्त्रमिदं महामुनिना पाणिनिना सूत्ररूपेण प्रणीतम्। ततः स्पष्टप्रतिपत्तये उक्तानुक्तदुरुक्तचिन्तनात्मकं वार्तिकं कात्यायनेन रचितम्। ततोऽपि सूत्रार्थस्य स्पष्टप्रतिपत्त्यर्थं महामुनिना पतञ्जलिना महाभाष्यं विरचितम्। तत्र महर्षिणा पाणिनिना

---

Asst. Professor, Dept. of Sanskrit, University of North Bengal.

लाघवेन शास्त्रसम्पादनार्थं स्वविरचिते अष्टाध्यायीग्रन्थे सूत्रसम्पादनकाले या पद्धतिः अनुसृता तस्याः मूलानि भवन्ति प्रभूतकार्यसाधकाः, प्रवृत्तिप्रयोजकाः प्रत्याहारादिसाधकाः वा अनुबन्धाः। अतः प्रबन्धेऽस्मिन् ''तथ्यभाण्डारव्यवस्थापने अनुबन्धानाम् उपयोगः'' इति शीर्षकमाधारीकृत्य तेषामनुबन्धानाम् उपयोगः प्रदर्श्यते।

२. प्रयोगरूपेण अनुबन्धशब्दः, तत्पदार्थश्च

यद्यपि पाणिनिना स्वविरचिते अष्टाध्याय्यादिग्रन्थे कुत्रापि अनुबन्धशब्दस्य प्रयोगः नैव कृतः, तथापि वार्तिककारेण स्ववार्तिकग्रन्थे, भाष्यकारेण पतञ्जलिना महाभाष्यग्रन्थे चानुबन्धशब्दः प्रयुक्तः एव। यथा वार्तिककारेण ''**वृत्तिसमवायार्थ उपदेशः**, अनुबन्धकरणार्थश्च, **इष्टबुद्ध्यर्थश्च**''[2] इत्यत्र ''प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न। आचारादप्रधानत्वाल्लोपश्च बलवत्तरः ॥''[3] इति श्लोकरूपे वार्तिके चानुबन्धशब्दः प्रयुक्तः। महाभाष्यकारेण तु वर्णसमाम्नाये विद्यमानानां वर्णानां प्रयोजनप्रतिपादनावसरे ''**अथ किमर्थो** वर्णानामुपदेशः ?''[4] इत्यनेन आक्षिप्य ''**वृत्तिसमवायार्थ उपदेशः**'' ''अनुबन्धकरणार्थश्च'', ''**इष्टबुद्ध्यर्थश्च**'' इति वार्तिकत्रयेण समाधानं प्रदत्तम्। तत्र ''**अनुबन्धकरणार्थश्च**'' इति वार्तिकभाष्ये भाष्याकारेण पतञ्जलिना अनुबन्धशब्दः प्रयुक्तः। यथा—''अनुबन्धकरणार्थश्च वर्णानामुपदेशः— **अनुबन्धानासङ्क्ष्यामीति**। नह्यनुपदिश्य वर्णाननुबन्धाः शक्या आसङ्क्तुम्। स एष वर्णानामुपदेशो वृत्तिसमवायार्थश्चानुबन्धकरणार्थश्च। वृत्तिसमवायश्चानुबन्धकरणं च प्रत्याहारार्थम्। **प्रत्याहारः वृत्यर्थः**''[5] इति।

पुनश्च ''**प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न**'' इति वार्तिकस्य व्याख्यानावसरे ''य एतेऽक्षु प्रत्याहारार्था **अनुबन्धाः क्रियन्ते**, एतेषामज्ग्रहणेन **ग्रहणं कस्मान्न भवति**?''[6] इति भाष्यवचनेऽपि अनुबन्धशब्दः प्रयुक्तः।

एतत्सर्वं पर्यालोच्य नागेशादयः **इत्संज्ञकान्** वर्णान् एव अनुबन्धशब्देन गृहीतवन्तः। अत एव नागेशेन परिभाषेन्दुशेखरे ''अनेकान्ता अनुबन्धाः'' इति परिभाषाव्याख्यानावसरे उक्तम्-''**इत्संज्ञका अनुबन्धाः**''[7] इति। इत्संज्ञकाः इत्संज्ञायोग्याः वा वर्णाः अनुबन्धपदबोध्याः इत्यर्थः।

३. पाणिनिनये **इत्त्वम्**

अनुबन्धाः नाम इत्संज्ञकाः इत्संज्ञायोग्याः वा वर्णाः इति प्रतिपादितम्। तत्र अजनुबन्धहलनुबन्धभेदेन ते अनुबन्धाः द्विधा भवन्ति। ते चानुबन्धाः भगवता महर्षिणा पाणिनिना अष्टाध्याय्यां धातुप्रत्ययादीनामाद्यन्तभागे भिन्नरूपेण गृहीताः सन्ति। तेषामित्संज्ञायोग्यरूपाणामनुबन्धानामित्संज्ञासम्पादनार्थं **पृथक् पृथक् सूत्रमपि महर्षिणा गृहीतम्**। यथा ''उपदेशेऽजनुनासिक इत्'' [१/३/२] इत्यनेन सूत्रेणोपदेशे विद्यमानस्यानुनासिकस्य स्वरवर्णस्य इत्संज्ञा भवति। उपशब्दस्य आद्यर्थकत्वात्, दिश्-धातोः उच्चारणक्रियायां वर्तमानत्वाच्च भावार्थकघञा निष्पन्नस्योपदेशशब्दस्य आद्योच्चारणमित्यर्थः सम्पद्यते। अत

एव उपदेशशब्देन धातुप्रातिपदिकनिपातप्रत्याहारसूत्रप्रत्ययादेशागमानां ग्रहणमिति भाष्ये प्रतिपादितम्। अनुनासिकत्वञ्च मुखसहितनासिकयोच्चार्यमाणत्वम्। एवश्च उपदेशे विद्यमानानामेतेषामनुनासिकानां स्वरवर्णानामित्संज्ञा सूत्रेणानेन भवति। पुनश्च प्रत्ययादीनां षकारचवर्गटवर्गाणामित्संज्ञार्थं ''षः प्रत्ययस्य'' [१/३/६] ''चुटू'' [१/३/७] इति सूत्रद्वयं गृहीतम्। तद्धितवर्जितानां प्रत्ययादीनां कवर्ग-लकार-शकाराणामित्संज्ञार्थं तु ''लशक्वतद्धिते'' [१/३/८] इति सूत्रं स्वीकृतम्। ''हलन्त्यम्'' [१/३/३] इति सूत्रेण धातुप्रत्ययादीनामन्त्यस्य हल्वर्णस्येत्संज्ञा विधीयते। ''आदिर्ञिटुडवः'' [१/३/५] इति सूत्रं तु धातोः आदौ विद्यमानस्य ञि टु डु इत्येतेषामित्संज्ञाविधानार्थम्। एवञ्च अनुबन्धत्वेन गृहीतानां वर्णानामित्संज्ञायां ''तस्य लोपः'' [१/३/९] इत्यनेन सूत्रेण तेषां लोपः विधीयते।

४. अनुबन्धस्वीकारे तात्पर्यम्

ननु अनुबन्धाः यदि लुप्यन्ते तर्हि किमर्थं तेषां ग्रहणमाचार्येण भगवता पाणिनिना शास्त्रे कृतमिति चेदुच्यते यद्यपि अनुबन्धानां मुख्यं फलं भवति लोपः तथापि भिन्नं प्रयोजनमपि विद्यते। यथा स्तुधातोः क्तप्रत्यये कृते, क्तप्रत्ययस्य ककारस्य ''लशक्वतद्धिते'' इति सूत्रेणेत्संज्ञायां ''तस्य लोपः'' इत्यनेन तस्य अनुबन्धककारस्य लोपे स्तु त इति जाते, किति क्तप्रत्यये परे ''क्ङिति च'' इत्यनेन सूत्रेण स्तुधातोः उकारस्य कित्त्वनिमित्तः गुणनिषेधः सिद्ध्यति। ततः ''सार्वधातुकार्धधातुकयोः'' इत्यनेन प्राप्तस्य गुणस्याभावे स्तुतः इति रूपम्। पुनश्च नडस्यापत्यमित्यर्थे फक्प्रत्यये, फकः ककारस्य ''हलन्त्यम्'' इति सूत्रेणेत्संज्ञायां ''तस्य लोपः'' इत्यनेन तस्य अनुबन्धककारस्य लोपे फकारस्यायनादेशे च नड आयन इति जाते, फक्प्रत्ययस्य कित्त्वात्तस्मिन् किति फकि तद्धिते परे ''किति च'' इत्यनेन सूत्रेण कित्त्वनिमित्तादिवृद्धिः प्राप्नोति। ततः नकारोत्तराकारस्य वृद्धौ आकारे नाडायनः इति रूपम्। इत्थमनुबन्धानां मुख्यफले लोपे सिद्धेऽपि तमनुबन्धं निमित्तीकृत्य गुणवृद्धिदीर्घह्रस्वादीनि बहुविधानि कार्याणि भवन्ति। अर्थात् कार्यान्तरोपदेशार्थम् अनुबन्धग्रहणमिति सुस्पष्टमेव।

४.१. गणपाठाश्रयेण शास्त्रनिर्माणाभाव :

ननु अनुबन्धमाश्रित्य यानि कार्याणि सिद्ध्यन्ति तानि कार्याणि गणपाठेनापि स्युः। अर्थात् अनुबन्धास्वीकारे ''अनुदात्तङित आत्मनेपदम्'' इत्यस्य स्थाने, आत्मनेपदिनः धातून् एकस्मिन् गणे संगृह्य ''एतेभ्यः आत्मनेपदम्'' इति सूत्रस्वीकारे एव कार्यं सम्भवेत्। ततश्च गणपाठेनैव कार्ये सिद्धे अनुबन्धग्रहणं किमर्थमिति चेदुच्यते यद्यपि गणपाठेन कार्यं स्यात्, तथापि एकस्मात् धातोः बहूनि कार्याणि यथा स्युः तदर्थमनुबन्धग्रहणम्। अन्यथा अनुबन्धानामस्वीकारे विविधकार्यार्थम् एकस्य धातोः पाठः भिन्नेषु भिन्नेषु गणेषु कर्तव्यः भवति। तत्र तत्रोच्चारणे तु गौरवं भवति। अतः तद्दोषनिवारणाय अनुबन्धानां ग्रहणम् आचार्येण कृतम्। ततः अनुबन्धमुल्लिख्य एव एकस्मात् धातोः भिन्नभिन्नकार्योपदेशः

सम्भवति। यथा इङ्-धातोः ङित्त्वात् एकेन ङकारानुबन्धेन "अनुदात्तङित आत्मनेपदम्" इति सूत्रेण आत्मनेपदप्रत्ययाः, "तास्यनुदात्तेन्ङिद्दुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः" इति सूत्रेण प्रत्ययस्वरः अनुदात्तश्चेति कार्यद्वयं सिद्ध्यति।

**४.२. लघूपायेन शास्त्रज्ञानलाभः**

पुनश्च लघूपायेन शास्त्रज्ञानाय अनुबन्धग्रहणम्। अन्यथा आत्मनेपदिनः धातून् एकत्र संगृह्य एते आत्मनेपदिनः धातवः इत्युच्यमाने, सर्वान् टित्प्रत्ययान् वा एकत्र संगृह्य एतेभ्यः ङीप् स्थात् इति उच्यमाने महद्गौरवं स्यात्। यतो हि उच्चारणाधिक्यमपि गौरवाय कल्प्यते। अतः सर्वान् धातून् उच्चार्य एते आत्मनेपदिनः धातवः इति ज्ञानापेक्षया "अनुदात्तङित आत्मनेपदम्" इत्यादिभिः प्रतिपादितं ङित्त्वादिनिमित्तमात्मनेपदित्वज्ञानं स्वल्पप्रयासेन भवतीति तु सुस्पष्टमेव। अतः लघुना उपायेन शास्त्रज्ञानार्थमनुबन्धग्रहणमिति सिद्धम्। एवम् "अनुदात्तङित आत्मनेपदम्" "स्वरितञितः कर्त्रभिप्राये क्रियाफले" इत्यादिषु सूत्रेषु गृहीतैः अनुबन्धैः लघूपायेन अधिकाधिकमात्मनेपदिनः धातवः ज्ञायन्ते। ततः "शेषात्कर्तरि परस्मैपदम्" इत्यनेन आत्मनेपदनिमित्तहीनाः धातवः परस्मैपदिनः इति ज्ञानमपि सम्भवति। पुनश्च "टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः" इत्यत्र टिद्ग्रहणेन लघुनोपायेन सर्वेषां टित्प्रत्ययानां ग्रहणं सम्भवति। एवं दीर्घह्रस्वलोपादिविधिष्वपि द्रष्टव्यम्।

**४.३. वृत्तिसमवायः**

वृत्तिसमवायार्थञ्चानुबन्धग्रहणम्। अणादिप्रत्याहाराणां सिद्ध्यर्थं वर्णसमाम्नाये णकारादयः अनुबन्धाः गृहीताः। एताननुबन्धानाश्रित्य "आदिरन्त्येन सहेता" इति सूत्रेणाणादयः प्रत्याहाराः सिद्ध्यन्ति। प्रत्याह्रियन्ते संक्षिप्यन्ते वर्णाः येन स प्रत्याहारः इत्यर्थः। तत्र अणादयः प्रत्याहाराः संज्ञाः, अणादिप्रत्याहारेण गृहीताः आदिमध्यगाः अ इ उ इत्यादयः वर्णाः संज्ञिनः च भवन्ति। ते चाणादयः प्रत्याहाराः वृत्त्यर्थाः एव भवन्ति। यतो हि अणादिभिः तेषां वर्णानां बोधः जायते।

**५. उपसंहारः**

इत्थं प्रबन्धेऽस्मिन् लघुना उपायेन शास्त्रनिर्माणार्थं वृत्तिसमवायार्थं वा व्याकरणशास्त्रस्याधारभूतायाम् अष्टाध्याय्यां प्रयुक्तानामनुबन्धानां स्वरूपं प्रयोजनं च प्रतिपादितम्। तत्र तथ्यभाण्डारव्यवस्थापने अनुबन्धानाम् उपयोगः समासेन सरलतया च प्रदर्शितः। यथा गुणवृद्धिह्रस्वादीनां बहुविधानां कार्याणां सरलमार्गेण सम्पादने, गौरवदोषयुक्तस्य गणपाठस्य परिहारे, लघूपायेन शास्त्रज्ञानलाभे, अनुबन्धैः साधिते प्रत्याहारे वृत्तिसमवाये च अनुबन्धानां कथमुपयोगः भवति तत् सोदाहरणं प्रतिपादितम्। महाभाष्यकारेण पतञ्जलिनापि अनुबन्धाश्रयेण निर्मितस्य व्याकरणशास्त्रस्य लघुत्वरूपं प्रयोजनमस्तीति समर्थितम्। अत एव उक्तं "लघ्वर्थं चाध्येयं व्याकरणम्" इति।

## अन्त्यटीका:

1 पाणिनीयशिक्षायां कारिका—४१, ४२
2 व्याकरणमहाभाष्यस्य प्रथमखण्डे पृष्ठसंख्या-१३१
3 व्याकरणमहाभाष्यस्य प्रथमखण्डे पृष्ठसंख्या-२५०
4 व्याकरणमहाभाष्यस्य प्रथमखण्डे पृष्ठसंख्या-१३१
5 व्याकरणमहाभाष्यस्य प्रथमखण्डे पृष्ठसंख्या-१३४
6 व्याकरणमहाभाष्यस्य प्रथमखण्डे पृष्ठसंख्या-२५०
7 परिभाषेन्दुशेखरे पृष्ठसंख्या-१९

## परिशीलितग्रन्थसूची


१) पतञ्जलिः। *व्याकरणमहाभाष्यम्* [द्वितीयखण्डः]। श्रीगुरुप्रसादशास्त्री (सम्पा.)। नवदेहली: राष्ट्रियसंस्कृतसंस्थानम्, २००६।

२) भट्टः, नागेशः। *परमलघुमञ्जूषा*। त्रिपाठी, जयशङ्करलालः (सम्पा.)। वाराणसी: कृष्णदास अकादमी, २००४।

३) भट्टः, नागेशः। *परिभाषेन्दुशेखरः*। मिश्रः, विश्वनाथः (सम्पा.)। वाराणसी : चौखम्बा सुरभारती प्रकाशन, २०११।

४) भट्टः, नागेशः। *लघुशब्देन्दुशेखरः* [द्वितीयभागः]। प्रो.बालशास्त्री (सम्पा.)। वाराणसी: चौखम्बासुरभारतीप्रकाशन, २००७।

५) भट्टः, नागेशः। *लघुशब्देन्दुशेखरः* (भैरवीटिप्पणीसहितः)। शर्मा, शिवप्रसादः, शर्मा, श्रीनिवासः च (सम्पा.) वाराणसी : चौखम्बा सुरभारती प्रकाशन, २००६।

६) भट्टः, कौण्डः। *वैयाकरणभूषणसारः* (साविश्रीव्याख्योपेतः)। मिश्रः, आद्याप्रसादः (सम्पा.)। वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, १९८८।

७) भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* [प्रथमोंऽशः]। श्रीबालकृष्णशर्मपञ्चोली (सम्पा.)। वाराणसी : मोतीलालबनारसीदास, १९६६।

८) भट्टोजिदीक्षितः। *प्रौढमनोरमा* (अव्ययीभावान्तः)। सभापतिशर्मोपाध्यायः (सम्पा.)। वाराणसी : वाणीविलासप्रकाशन, १९९७।

९) भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी* [प्रथमखण्डः]। श्रीगोपालदत्तपाण्डेयः (सम्पा.)। वाराणसी : चौखम्बासुरभारतीप्रकाशन, २०१०।

१०) वामनजयादित्यौ। *काशिका* (न्यासपदमञ्जरीसहिता) [चतुर्थखण्डः]। त्रिपाठी, जयशङ्करलालः; मालवीयः, सुधाकरः च (सम्पा.)। वाराणसी : तारा बुक एजेन्सी, १९८४।